दारदः, पुं, (दरदे देशविशेषे भवः । दरद+अण् ।) दरददेशोद्भवविषभेदः । इत्यमरः । १ । ८ । ११ ॥ पारदः । हिङ्गुलम् । इति मेदिनी । दे, ३१ ॥ समुद्रः । इति हारावली । ५६ ॥

दारबलिभुक्, पुं, (दारेण चञ्चुाघातजन्यविदारणेन बलिं भुङ्क्ते इति । भुज+क्विप् ।) बकपक्षी । इति त्रिकाण्डशेषः ॥

दाराः, पुं, (दारयन्ति भ्रातृबन्धूनिति । दॄ+"दारजारौ कर्त्तरि णिलुक् च ।" ३ । ३ । २० । इत्यस्य वार्त्तिकोक्त्या घञ् णिलुक् च ।) भार्य्या । बहुवचनान्तोऽयम् । इत्यमरः । २ । ६ । ६ ॥ (यथा, महाभारते । १ । १५६ । २७ ।
"आपदर्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि ।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि ॥")

दारा, स्त्री, (दारयति भ्रातृबन्धूनिति । दॄ+णिच्+अच्+टाप् ।) दाराः । इत्यमरटीकायां भरतः ॥ (यथा, भागवते । ७ । १४ । ११ ।
"अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः ॥")

दारिः, स्त्री, (दारयतीति । दॄ+णिच्+इन् ।) विदारकः । इति शब्दार्थकल्पतरुः ॥

दारिका, स्त्री, (दारक+टापि अत इत्वम् ।) कन्या । इति जटाधरः ॥ (यथा, हरिवंशे । ४१ । १५६ ।
"अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम् ॥")

दारितः, त्रि, (दार्य्यते स्मेति । दॄ+णिच्+क्तः ।) कृतदारणः । तत्पर्य्यायः । भिन्नः २ भेदितः ३ । इत्यमरः । ३ । १ । १०० ॥ विदारितः ४ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । १०७ । ४६ ।
"अंशुमानेवमुक्तस्तु सगरेण महात्मना ।
जगाम दुःखात् तं देशं यत्र वै दारिता मही ॥"
ताडितः । यथा, कालिकापुराणे ६० अध्याये ।
"ततः सुदर्शनो राजा गदया दारितोऽपतत् ॥")

दारिद्र्यं, क्ली, (दरिद्रस्य भावः । दरिद्र+ष्यञ् ।) दरिद्रता । यथा,—
"प्रणीय दारिद्र्यदरिद्रतां नृपः ।"
इति नैषधे । १ । १५ ॥
(यथा, मृच्छकटिके १ अङ्के ।
"दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥")
निर्य्यकारान्तोऽप्ययम् ॥

दारी, स्त्री, (दारयति पदतलमिति । दॄ+णिच्+"सर्व्वधातुभ्य इन् ।" उणां ४ । ५८ । इति इन् । कृदिकारादिति पक्षे ङीष् ।) क्षुद्ररोगविशेषः । बिवाई इति लोके । तल्लक्षणम् यथा,—
"परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः ।
पादयोः कुरुते दारीं सरुजां तलसंश्रिताम् ॥"
तच्चिकित्सा यथा,—
"पाददार्य्यां शिरां प्राज्ञो मोचयेत्तलशोधिनीम् ।
स्नेहस्वेदोपपन्नौ च पादौ वा लेपयेन्मुहुः ।
मधूच्छिष्टवसामज्जाहतैः क्षारविमिश्रितैः ॥
क्षारो यवक्षारः ।
सर्ज्जाह्वसिन्धूद्भवयोश्चूर्णं मधुघृतप्लुतैः ।
निर्म्मथ्य कटुतैलाक्तं हितं पादप्रमार्ज्जने ॥
मधुसिक्थकगैरिकघृतगुडमहिषाक्ष-शाल-निर्य्यासैः ।
गैरिकसहितैर्लेपः पादस्फुटनापहः श्लिष्टः ॥
मधुसिक्थक मोम । प्रथमं गैरिकं शिलाजतु । द्वितीयं गैरिकं गेरु इति लोके । सालनिर्य्यास रालः ।
उन्मत्तकस्य बीजेन माणकक्षारवारिणा ।
विपक्वं कटुतैलन्तु हन्याद्दारीं न संशयः ॥
इति धत्तूरतैलम् ॥" इति भावप्रकाशः ॥

दारु, क्ली, पुं, (दीर्य्यते इति । दॄ+"दॄसनिजनीति॰" उणां । १ । ३ । इति ञुण् ।) काष्ठम् । इत्यमरभरतौ ॥ (यथा, महाभारते । १ । १४५ । ११ ।
"शणं तैलं घृतञ्चैव जतु दारूणि चैव हि ।
तस्मिन् वेश्मनि सर्व्वाणि निक्षिपेथाः समन्ततः ॥")

दारु, स्त्री, (दॄ+ञुण् ।) देवदारु । (यथा, सुश्रुते उत्तरतन्त्रे । १७ ।
"दारुपद्मकशुण्ठीभिरेवमेव कृतोऽपि वा ॥"
अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"सुरदारु इन्द्रकिलिमं सुराह्वं भद्रदारु च ।
देवकाष्ठं पीतदारु देवदारु च दारु च ॥")
पित्तलम् । इति मेदिनी । रे, ४७ ॥

दारुः, त्रि, (दॄ+ञुण् ।) शिल्पी । दारकः । इति धरणी ॥ (यथा, ऋग्वेदे । ७ । ६ । १ ।
"इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ॥"
"दारुं पुरां भेत्तारं वन्दे ।" इति तत्र सायनः ॥)
दाता । इति त्रिकाण्डशेषः ॥

दारुकं, क्ली, (दारु+स्वार्थे कन् ।) देवदारु । इति राजनिर्घण्टः ॥

दारुकः, पुं, श्रीकृष्णसारथिः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । २ । २ । २८ ।
"दारुकेण च सूतेन सहितो देवकीसुतः ॥"
योगाचार्य्यविशेषः । स तु महादेवस्य अवतारविशेषः । यथा, शिवपुराणे वायुसंहितायाम् । २ । १० । ४ ।
"जटामाली चाट्टहासो दारुको लाङ्गली तथा ॥")

दारुकदली, स्त्री, (दारुवत् कठिना कदली ।) वनकदली । इति राजनिर्घण्टः ॥

दारुका, स्त्री, (दारुणा काष्ठेन कायतीति । कै+कः । टाप् ।) काष्ठमयस्त्री । काठेर पुतुल इति भाषा । तत्पर्य्यायः । पुत्त्रिका २ दारुस्त्री ३ शालभञ्जिका ४ शालभञ्जी ५ शालाङ्गी ६ । इति शब्दरत्नावली ॥ दारुपुत्त्रिका ७ शुकटी ८ दारुगर्भा ९ । इति हारावली । ७१ ॥

दारुगन्धा, स्त्री, (दारुणि गन्धो यस्याः ।) चीडानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

दारुगर्भा, स्त्री, (दारुमयो गर्भो यस्याः ।) दारुमयस्त्री । इति हारावली । ७१ ॥

दारुजः, पुं, (दारुणो जायते इति । जन+डः ।) मर्द्दलः । इति शब्दरत्नावली ॥ काष्ठनिर्म्मिते, त्रि ॥ (यथा, कालिकापुराणे । ६७ अध्याये ।
"आसनं प्रथमं दद्यात् पौष्पं दारुजमेव वा ॥")

दारुणः, पुं, (दारयतीति । दॄ+णिच्+"कॄदारिभ्य उनन् ।" उणां ३ । ५३ । इति उनन् ।) चित्रकः । इति राजनिर्घण्टः ॥ भयानकरसः । (विष्णुः । यथा, महाभारते । १३ । १४९ । ७४
"सुधन्वा खण्डपरशुर्द्दारुणो द्रविणप्रदः ॥"
"सन्मार्गविरोधिनां दारुणत्वात् (खण्डकत्वात्) दारुणः ।" इति तद्भाष्ये शङ्करः ॥) भयहेतौ, त्रि । इत्यमरः । १ । ७ । २० ॥ (यथा, देवीभागवते । ५ । ४ । २१ ।
"हाहाकारो महानासीत् सम्प्रहारश्च दारुणः ।
उत्पपात ततः सिंहो वृषस्योपरि दारुणः ॥"
कठोरः । यथा, तत्रैव । १ । ४ । ५२ ।
"दारुणं देहदमनं सर्व्वलोकभयङ्करम् ॥")

दारुणकं, क्ली, (दारुणवत् कायतीति । कै+कः ।) मस्तकजातक्षुद्ररोगविशेषः । लोके रूषी इति ख्यातः । तस्य लक्षणमाह ।
"दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते ।
मारुतश्लेष्मकोपेन विद्याद्दारुणकन्तु तत् ॥
दारुणा कर्कशा ॥"
तस्य चिकित्सा यथा,—
"कार्य्यो दारुणके मूर्द्ध्नि प्रलेपो मधुसंयुतः ।
पियालबीजमधुककुष्ठमाषैः ससैन्धवैः ॥
आम्रबीजं तथा पथ्या द्वयं स्यात् मात्रया समम् ।
दुग्धेन पिष्टं तल्लेपो दारुणं हन्ति दारुणम् ॥
दुग्धेन खाखसं बीजं प्रलेपाद्दारुणं हरेत् ।
गुञ्जाफलैः शृतं तैलं भृङ्गराजरसेन च ॥
कण्डूदारुणहृत् कुष्ठकपालव्याधिनाशनम् ॥"
इति गुञ्जातैलम् ।" इति भावप्रकाशः ॥
(अथ भृङ्गराजतैलम् ।
"भृङ्गराजत्रिफलोत्पलशारि
लौहपुरीषसमन्वितकारि ।
तैलमिदं पच दारुणहारि
कुञ्चितकेशघनस्थितकारि ॥"
इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ॥)

दारुनिशा, स्त्री, (दारुबहुला निशा हरिद्रा ।) दारुहरिद्रा । इति रत्नमाला ॥ (अस्या गुणा यथा,—
"दार्व्वीनिशातुल्या किन्तु नेत्रकर्णास्यरोगनुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

दारुपत्री, स्त्री, (दारुणः पत्त्रमिव पत्त्रमस्याः । ङीष् ।) हिङ्गुपत्री । इति राजनिर्घण्टः ॥

दारुपीता, स्त्री, (दारुणा पीतेव । काष्ठप्रधानत्वात् तथात्वम् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

दारुपुत्त्रिका, स्त्री, (दारुमयी पुत्त्रिका ।) दारुका । इति हारावली । ७१ ॥

दारुमुख्याह्वया, स्त्री, (दारुमुख्यमाह्वयते स्पर्द्धते इति । आ+ह्वे+अच् ।) गोधा । इति राजनिर्घण्टः ॥